लोकप्रियशास्त्रीयग्रन्थमाला - १

महामहोपाध्याय-हरिहरकृपालुद्विवेदिकृतया
संस्कृतटीकया संवलिता
शङ्करमिश्रविरचितया आमोदटीकया समलङ्कृता च

# न्यायकुसुमाञ्जलिः


सम्पादकः
**प्रो. वाचस्पतिद्विवेदी**

सहसम्पादकः
**प्रो. हरेरामत्रिपाठी**



**राष्ट्रियसंस्कृतसंस्थानम्**
मानितविश्वविद्यालयः
नवदेहली

# विषयसूची


| विषयाः | पृष्ठसंख्या |
|---|---|
| पुरोवाक् | iii |
| प्रास्ताविकं किञ्चित् | v |
| प्रथमः स्तबकः | १ |
| द्वितीयः स्तबकः | ९७ |
| तृतीयः स्तबकः | १३२ |
| चतुर्थः स्तबकः | १९१ |
| पञ्चमः स्तबकः | २१० |

तत्र प्रमाणसद्भावप्रदर्शनेन व्यवस्थाप्यते। एवं व्याख्यानेन "यजेत स्वर्गकाम" इत्यादिश्रुत्या स्वर्गादिफलं प्रति उपायतया यागादीनामेव। विधानदर्शनेनेश्वरमननस्य स्वर्गं प्रति कारणत्वाभिधानमसंङ्गतमिति शङ्का निराकृता भवति। स्वर्गपदेनात्र जीवन्मुक्तेरेव विवक्षितत्वात्। जीवन्मुक्तिपरमुक्त्योरे ऽश्वरज्ञानसाध्यत्वप्रदर्शनेन जीवन्मुक्तिसहित-परममुक्तिः ब्रह्मप्रबन्धप्रयोजनमिति स्पष्टमुपलभ्यते। अयमभिसन्धिः–कर्म त्रिविधं सञ्चितं, प्रारब्धं, क्रियमाणं च। तत्र प्रारब्धं कर्म, भोगं विना न क्षीयते तत्तात्पर्येण नाभुक्तं क्षीयते कर्मेत्यभिधानम्। सञ्चितकर्मविषये द्विविधं मतम्। योगप्रकर्षबलेन योगी एकस्मिन्नेव जन्मनि नानाशरीराणि परिगृह्यानेकजन्मभोगकर्मफलानि भुञ्जानो निश्शेषं तानि क्षपयित्वा प्रक्षीणकर्मराशिः सम्पद्यते इत्यर्थकं मतम्। मतान्तरे तु सञ्चितकर्मराशेरीश्वरज्ञानादेव प्रक्षयः, "क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यादिश्रुत्या ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन" इत्यादिस्मृत्या च स्पष्टमेव बोध्यत इति। ईश्वरमननादिषु व्यापृतस्य क्रियमाणं कर्म बन्धाय न भवति। "न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य देहिन" इति पातञ्जलोक्तेः। तथा च न तस्य नवीनकर्मार्जनशंकर ईश्वरमननं च न मिथ्याज्ञाननिवर्तनद्वारामोक्षहेतुः वैयधिकरण्यात्, किन्तु–अदृष्टद्वारा तदुपासनाजन्यादृष्टेन जीवस्य मिथ्याज्ञानं नश्यति, ततस्तत्साक्षात्का-राऽनन्तरं मोक्ष इति तत्त्वविदां परामर्शः।

ईश्वरमननं च तत्प्रमाणव्युत्पादनं विना न सम्भवतीति तत्प्रमाणव्युत्पादनमपि परम्परया मोक्षहेतुरिति सप्रयोजनम्। "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति श्रुत्येश्वरमननस्य मोक्षहेतुत्वं प्रतीयते, अत एव स हि तत्त्वतो ज्ञातः साक्षात्कारस्योपकरोतीत्यभियुक्ताः। अन्ये तु ईश्वरमननस्य मोक्षहेतुत्वे श्रुत्या प्रमितस्योपपत्तये अदृष्टं द्वारं कल्पनीयमित्याहुः। परे तु ईश्वरोपासनायाः स्वर्गः अपवर्गश्चेत्युभयं फलम् तत्तत्फलकामनाविशिष्टोपासनानां भेदादिति नैकहेतुतो विरोध्यनेककार्याशङ्काः। ननु "ण्यासश्रन्थोयुजि"त्यनेनेह युजि उपासना इत्येव प्रयोगो युज्यते न तूपास्तिरिति क्तिनो युजावाधादिति चेन्न। "क्वचिदपवादविषयेऽपि उत्सर्गः प्रवर्तते" इति न्यायाद् बाहुलकत्वाद्वा क्तिनोऽप्युक्तेः। अथवा भवेत्–इति वद् धातुस्वरूपनिर्देशे स्तिप् प्रत्ययः। तस्य धातुस्वरूपवाचकत्वेऽपि गभीरनदीतीरे नदीपदवत् उपासनार्थे तस्य लक्षणा। दृष्टान्तविधया द्विरेफपदोपादानन्तु शब्दोपस्थापकस्यार्थे लक्षणेति तात्पर्येण।२।।

## आमोदः

न्यायविषयं विविच्य दर्शयति–स्वर्गेति। स्वर्गयोरिव दुःखासम्भिन्नतयाऽपवर्गयो-र्जीवन्मुक्तिपरममुक्त्योर्मार्गमुपायमामनन्ति कथयन्ति। उपास्तिम् उपासनाम्। "तमेव



योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्

# राष्ट्रियसंस्कृतसंस्थानम्

**मानितविश्वविद्यालय**

नवदेहली